श्रीमज्जिनभद्रगणिक्षमाश्रमणविनिर्मितः

बृहत्क्षेत्रसमासः ।

श्रीमन्मलयगिरिसूरिसुत्रामसूत्रितया विवृत्योपेतः

प्रकाशयित्री—

श्रीजैनधर्मप्रसारकसभा—भावनगर.

इदं पुस्तकं मुम्बय्यां शेठ–कुंवरजी–आणंदजी प्रमुख श्रीजैनधर्मप्रसारकसभा–भावनगर इत्यनेन निर्णय-सागरमुद्रालये कोलभाटवीथ्यां २३ तमे गृहे रामचंद्र येसू शेडगेद्वारा मुद्रयित्वा प्रकाशितम् ॥

वीर संवत् २४४७ विक्रम संवत् १९७७

Printed by Ramchandra Yesu Shedge, at the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay.

Published by Shath Kuverji Anandji, for Jain Dharmaprsarak Sabha, Bhavnagar.

प्रस्तावना ।

इह हि अपारसंसारपारावारान्तर्निमज्जतां मकरमत्स्यतिमितिमिङ्गिलानुकारजन्मजरामरणरोगशोकैर्निगिल्यमानत्वेन निर्विण्णानां प्राप्तजिनप्रवचनतत्त्वसुधारसपिपासूनां करालकलिकालकवलितप्रज्ञाकलापानां भव्यसत्त्वानामुपकाराय पञ्चाचारपालनप्रवीणमुनिमधुलिड्लिह्यमानचरणतामरसरजोभिः श्रीमज्जिनभद्रगणिक्षमाश्रमणप्रवरैर्गुम्फितानुयोगगर्भितार्थद्वीपद्वयसमुद्रद्वयापरनामसमयक्षेत्रप्ररूपणतासंबद्धमतिगम्भीरं कुशाग्रीयमतिजनावगाह्यमेतत् बृहत्क्षेत्रसमासाभिधानं प्रकरणरत्नं निबद्धम् ।

तच्च नर्ते टीकामेतत्प्रकरणार्थावबोधेप्सूनां मन्दमेधसामुपयोगीति करुणापरीतचेतोभिरिन्दुसमानिकसिद्धचक्राधिष्ठातृश्रीविमलेश्वरदेवाप्तटीकाकरणवरैर्मुनिप्रवरैः श्रीमद्भिर्मलयगिरिसूरिपुरन्दरैरनवगाढशास्त्रान्तरजनावगाह्यटीकोपशोभितं विनिर्मितम् ।

यद्यप्यत्र प्रकरणे प्रकरणकारैः क्वापि नोपनिबद्धमात्मीयमभिधानं तथापि टीकाकृद्भिः प्रकरणान्ते—

" तं नमत बोधिजलधिं गुणमन्दिरमखिलवाग्मिनां श्रेष्ठम् ।
चरणश्रियोपगूढं श्रीजिनभद्रगणिक्षमाश्रमणम् ।
वाचः क्व तस्य गम्भीरा परभागमुपागता ॥
क्व चाहं जडधीरेष स्वल्पशास्त्रकृतश्रमः ॥"

इत्यनेनोल्लेखितेन पद्ययुग्मेन जिनभद्रगणिक्षमाश्रमणोपज्ञत्वमस्य स्फुटमेव ।

कदा चैतेऽनेकगम्भीरार्थग्रंथग्रथनविस्मापितविबुधजनवृन्दाः स्वसत्तया भारतं महीमण्डलमलञ्चक्रिरे? केषां च आख्यनामधेयानां शिष्यत्वेनात्मानं कृतकृत्यं मन्वाना एते क्षमाश्रमणाः? इति नाववोद्धुं शक्यते सम्यक् तथापि "वाई य खमासमणे दिवायरे वायग त्ति एगट्ठा । पुव्वगयम्मि य सुत्ते एए सद्दा पउंजंति ॥ १ ॥" इत्यनयार्यया क्षमाश्रमणादिशब्दाः पूर्वधरेष्वेव संबध्यन्त इति निश्चयादेतेषां पूर्वधरत्वं क्षमाश्रमणपदालङ्कृतत्वेन । अत एवानर्वाचीनत्वमेतेषाम् ।

टीकाकृतां सत्तासमयो हि कुमारपालभूपालप्रतिबोधकश्रीहेमचन्द्राचार्यसमानकालीनत्वेन द्वादशशताब्द्या उत्तरार्धं त्रयोदशशताब्द्याः पूर्वार्धमिति जिनमण्डनगणिगुम्फितकुमारपालचरितान्तर्गतेन—

"एकदा श्रीगुरूनापृच्छ्य (श्रीहेमचन्द्रसूरयः) अन्यगच्छीयश्रीमद्देवेन्द्रसूरिमलयगिरिभ्यां सह कलाकौशलाद्यर्थं गौडदेशं प्रस्थिताः । * * * * * श्रीरैवतकदैवतदृष्टौ गुरूक्तविधिना समीपस्थपद्मिनीस्त्रीकृतोत्तरसाधकक्रियाः श्रीसिद्धचक्रमसाधयन् । तत इन्द्रसामानिकदेवोऽस्याधिष्ठाता श्रीविमलेश्वरनामा प्रत्यक्षीभूय पुष्पवृष्टिं विधाय स्वेप्सितं वरं वृणुतेत्युवाच । ततः श्रीहेमचन्द्रसूरिणा राजप्रतिबोधः, देवेन्द्रसूरिणा कान्तीनगर्याः प्रासादानयनं, मलयगिरिसूरिणा सिद्धान्तवृत्तिकरणवरो वृतः इति । त्रयाणां वरं दत्त्वा स्वस्थानं जगाम ॥"

विषयानुक्रमणिका ।

विषयः				प्रारंभः. पर्यंतः. पत्राणाम्
१ जम्बूद्वीपाधिकारः	....	....	....	१–१८१
सूर्यचारप्ररूपणा	....	....	....	१५९–१७१
चन्द्रचारप्ररूपणा	...	....	....	१७१–१७९
नक्षत्रचारप्ररूपणा	....	....	....	१८०–१८१
२ लवणाब्ध्यधिकारः	....	....	....	१८२–२१५
अन्तरद्वीपप्ररूपणा	....	....	....	२०४–२०८
३ धातकीखण्डद्वीपाधिकारः	....	....	....	२१५–२४१
४ कालोदध्यधिकारः	....	....	....	२४१–२४५
५ पुष्करवरद्वीपार्धाधिकारः	....	....	....	२४५–२७०

अनेनोल्लेखेन स्पष्टतयाऽवबुध्यते ।

पञ्चाधिकारात्मकस्यास्य मूलग्रन्थस्य प्रमाणं गाथानां पञ्चपञ्चाशदधिकानि षट्शतानि, "गाहाणं छच्च सया पणपन्ना हुंति इत्थ सत्थम्मि ।" इति वचनात् । तथाहि—प्रथमेऽधिकारे ३९८, द्वितीये ९०, तृतीये ८१, चतुर्थे ११, पञ्चमे ७५, सर्वसङ्कलनया ६५५ । यत्किलात्र टीकाकृद्भिः "गाहाणं छच्च सया सत्तत्तीसा य होंति पडिपुण्णा" इति पाठानुसारेण व्याख्यानं कृतं तत्कारणं तु प्रक्षिप्तगाथाऽगणनमन्यद्वा कारणान्तरं भविष्यतीति त एव जानन्ति । किञ्च न ह्यत्र क्वचिदपि बृहत्संग्रहण्यादिवत् प्रक्षिप्तेयमिति सूचाकृता दृश्यते । मूलटीकोभयसंकलनप्रमाणमनुष्टुभां पंचनवतिशतान्यनुमानतः । ९५०० ग्रंथाग्रम् । विषयस्त्वस्य पृथगुपपादितविषयानुक्रमणिकातोऽवसेयः ।

मुद्रितेनानेन सटीकबृहत्क्षेत्रसमासप्रकरणेनासादितसम्यक्तदर्थभावितमनसो दृढध्यानसत्त्वा भव्यसत्त्वा आराध्य धर्मशुक्लध्याने प्राप्नुवन्तु परमपदमित्याशास्महे । भविष्यति चानेन नः मुद्रणप्रयासः फलेग्रहिरिति ।

महता प्रयत्नेन संशोधितेऽप्यस्मिन् शास्त्रे यत्र क्वचनाशुद्धिरसादृष्टिदोषेणावशिष्टा स्यात्संशोधयन्तु शुद्धस्वान्ताः सज्जना इत्यभ्यर्थ्यते—

आश्विनशुदि–१
संवत् १९७७.

श्रीजैनधर्मप्रसारकसभा.
भावनगर.

(श्रीजिनभद्रगणिक्षमाश्रमणविरचितः)

॥ बृहत् क्षेत्रसमासः ॥

(श्रीमलयगिरिकृतटीकासहितः)

ॐ नमः । श्रीमद्विघ्नविच्छिदे नमः । श्रीसरस्वत्यै नमः ॥

जयति जिनवचनमवितथममितगम्भीरार्थमखिलनयकलितम् ।
अजितं परतीर्थिगणैः शिवसुखफलदायि परमशिवम् ॥ १ ॥
कलिकालेऽपि यथास्थितजिनसिद्धान्तप्रकाशकरणेन । जयति भरतैकदीपो जिनभद्रगणिक्षमाश्रमणः ॥ २ ॥
विवृणोमि यथाशक्ति क्षेत्रसमासं समासतः स्पष्टम् । यदवगतौ मन्दा अपि जायन्ते श्रुतविदः परमाः ॥ ३ ॥

इह जिनभद्रगणिक्षमाश्रमणो मन्दमेधसामवबोधाय सकलजम्बूद्वीपप्रज्ञप्त्यादिशास्त्रसंक्षेपं समुद्धर्तुकामोऽविघ्नेनेष्टसिद्ध्यर्थमिष्टदेवतानमस्कारं प्रेक्षावतां प्रवृत्त्यर्थमभिधेयादिकं च प्रतिपिपादयिषुरिदमाह—

१ प्रसिद्ध्यर्थमित्यपि पाठः ।

नमिऊण सजलजलहर–निभस्सणं वद्धमाणजिणवसभं ।
समयक्खेत्तसमासं, वोच्छामि गुरूवएसेणं ॥ १ ॥

व्याख्या—रागद्वेषमोहोपसर्गघातिकर्मजेतृत्वाज्जिनः । स चोत्पन्नकेवलज्ञानो मुण्डकेवल्यपि[1] भण्यते, ततस्तद्व्यवच्छेदार्थं वृषभशब्दमाह—जिनानां वृषभो जिनवृषभः, वृषभशब्दः पूजावाची, जिनानामपि तीर्थंकरतया पूज्य इत्यर्थः । ते ह्युत्पन्नकेवलज्ञाना अपि भगवन्तं तीर्थकृतं प्रदक्षिणीकृत्य तत्पर्षदि निविशन्ते, नान्यथेति । स चैवंभूत ऋषभादिरपि वर्तते, न च तत्तीर्थे ग्रन्थकृदवतिष्ठते, ततोऽधिकृततीर्थाधिपतिजिनवृषभप्रतिपत्त्यर्थं तन्नामधेयमाह—'वद्धमाण त्ति' वर्धमानो वर्धमानाभिधश्चासौ जिनवृषभश्च वर्धमानजिनवृषभः तं ज्ञातकुलनभस्तलमृगाङ्कं श्रीसिद्धार्थनरेन्द्रसुतमपश्चिमतीर्थकृतं वर्धमानस्वामिनमित्यर्थः । 'नमिऊण' नत्वा । कथंभूतमित्याह—सजलजलधरनिभस्वनं सजलजलधरस्य निभः सदृशः स्वनः शब्दो यस्य स तथा तं जलभृतपयोदमिव गम्भीरस्वनमित्यर्थः, तं नत्वा । किमित्याह—'समयक्षेत्रसमासं' समयः सूर्यगमनक्रियोपलक्षितः परमनिरुद्धः कालविशेषः, तदुपलक्षितं क्षेत्रं समयक्षेत्रं मनुष्यक्षेत्रमिति भावः । न हि मनुष्यक्षेत्राद्बहिः सूर्यगमनक्रियोपलक्षितो नाम कोऽपि कालोऽस्ति, एतच्चाभिहितं प्रपञ्चतस्तत्त्वार्थटीकायामिति नेहाभिधीयते, किं तु तत एवात्रधार्यम् । तस्य समासः

१ सामान्यकेवल्यपि ।

संक्षेपः समयक्षेत्रसमासः। इह समयक्षेत्रगता या काचिद्वक्तव्यता सा आधेये आधारोपचारात् समयक्षेत्रमित्युक्तं, यथा मञ्चाः क्रोशन्तीत्यत्र मञ्चस्थाः पुरुषा मञ्चाः, ततोऽयमर्थः—समयक्षेत्रगताया वक्तव्यतायाः प्रतिपादको यः समासः संक्षेपः स्वल्पग्रन्थरूपस्तमहं वक्ष्ये। कथमित्याह—गुरूपदेशानुसारेण अनेन स्वमनीषिकाव्युदासमाह। इह समयक्षेत्रवक्तव्यताऽभिधेया (यं), तत्परिज्ञानं श्रोतृणामनन्तरप्रयोजनं, कर्तुः परानुग्रहः, परम्पराप्रयोजनं तूभयोरपि निःश्रेयसावाप्तिः। सम्बन्धस्तूपायोपेयभावलक्षणः, तत्र वचनरूपापन्नं प्रकरणमुपायः तत्परिज्ञानं चोपेयमिति ॥ १ ॥

समयक्षेत्रसमासं वक्ष्य इत्युक्तं, समयक्षेत्रं चाभिधीयते मनुष्यक्षेत्रं, तच्च द्वीपसमुद्रात्मकमतस्तत्प्रसङ्गतः सर्वद्वीपसमुद्रसङ्ख्यामाह—

जंबुद्दीवाईया, सयंभुरयणायरावसाणाउ।

सव्वे वि असंखिज्जा, दीवोदहिणो तिरियलोए ॥ २ ॥

व्याख्या—इह तिर्यग्लोक इति वैयधिकरण्येन द्वीपसमुद्राणां विशेषणं, विशेषणं च व्यवच्छेदकं भवति, अन्यथा तत्प्रयोगनैरर्थक्यापत्तेः, ततोऽयमर्थः—द्वीपोदधयः तिर्यग्लोके भवन्ति, नोर्ध्वलोके, नाप्यधोलोके, तथा भगवता प्रतिपादनात्, तेन ये पातालेऽपि समुद्रादिकमिच्छन्ति, न ते तत्त्ववेदिन इत्यावेदितं द्रष्टव्यम्। ते च तिर्यग्लोके भवन्तो द्वीपोदधयः किमादिकाः किंपर्यवसानाश्चेत्यत आह—

जम्बूद्वीपादयः स्वयंभूरमणरत्नाकरपर्यवसानाः, तथाहि—सर्वद्वीपसमुद्राणामभ्यन्तरवर्ती प्रथमो जम्बूद्वीपः, ततो लवणोदः, ततो धातकीखण्डो द्वीपः, तदनन्तरं कालोदः समुद्रः, ततः पुष्करवरो द्वीपः, पुष्करवरोदः समुद्रः, वारुणिवरो द्वीपः, वारुणिवरोदः समुद्रः, क्षीरवरो द्वीपः, क्षीरवरोदः समुद्रः, घृतवरो द्वीपः, घृतवरोदः समुद्रः, इक्षुवरो द्वीपः, इक्षुवरोदः समुद्रः, नन्दीश्वरो द्वीपः, नन्दीश्वरोदः समुद्रः, अरुणवरो द्वीपः, अरुणवरोदः समुद्रः, एवं द्वीपादनन्तरं समुद्रः समुद्रादनन्तरं द्वीप इत्यनेन क्रमेण द्वीपसमुद्रा यथागमं तावद्वाच्या यावत् पर्यन्ते स्वयंभूरमणो द्वीपस्ततः स्वयंभूरमणः समुद्रः। एते च सर्वेऽपि द्वीपसमुद्रा आदिद्वीपवर्जाः पूर्वपूर्वपरिक्षेपिणः, तथाहि—जम्बूद्वीपः सर्वद्वीपसमुद्राणामभ्यन्तरस्तैलापूपसंस्थानश्च, ततो नासौ कमपि द्वीपं समुद्रं वा परिक्षिप्तवान्, किंत्वेष एव लवणोदसमुद्रेण चक्रवालतया सर्वतः परिक्षिप्तः, लवणोदसमुद्रो धातकीखण्डेन, धातकीखण्डः कालोदसमुद्रेण, कालोदसमुद्रः पुष्करवरद्वीपेन, पुष्करवरद्वीपः पुष्करवरसमुद्रेण, एवं तावद्वाच्यं यावत् पर्यन्ते स्वयंभूरमणो द्वीपः स्वयंभूरमणसमुद्रेण परिक्षिप्तः। ते च सर्वसङ्ख्यया कियन्त इत्याह—सर्वेऽपि सर्वसङ्ख्यया असङ्ख्येयाः सिद्धान्तपरिज्ञापितासङ्ख्यातरूपसङ्ख्यास्थानपरिमिताः ॥ २ ॥

तच्चासङ्ख्येयत्वमसङ्ख्यातभेदभिन्नमिति प्रतिविशिष्टासङ्ख्येयत्वप्रतिपादनार्थमाह—

उद्धारसागराणं, अड्डाइज्जाण जत्तिया समया ।
दुगुणादुगुणपवित्थर-दीवोदहि रज्जु एवइया ॥ ३ ॥

व्याख्या—अर्धं तृतीयं येषां तानि अर्धतृतीयानि द्वे सागरे अर्धं चेत्यर्थः तेषामुद्धारसागरोपमाणां । इह सागरोपमाणि त्रिधा भवन्ति, तद्यथा—अद्धासागरोपमाणि क्षेत्रसागरोपमाणि उद्धारसागरोपमाणि च । तत्राद्धाक्षेत्रव्यवच्छेदार्थमुद्धारग्रहणं । अथ किमिदमुद्धारसागरोपममिति ? उच्यते—उत्सेधाङ्गुलप्रमाणेनायामविष्कम्भाभ्यामुद्वेधेन च योजनप्रमाणः पल्यः परिकल्प्यते, ततस्तं देवकुरूत्तरकुरुमिथुनसत्कानेकादिसप्ताहोरात्रप्ररूढान् केशान् गृहीत्वा तेषां प्रत्येकमसङ्ख्येयानि खण्डानि विधाय तैस्तथा निचितमापूर्यते यथोपरि भारशतलोहगोलकाक्रमणेऽपि न मनागपि निम्नीभवति, ततः समये समये एकैकं वालाग्रमुद्ध्रियते, यावता च कालेन स पल्यो निर्लेपीभवति तावान् कालविशेष उद्धारपल्योपम उच्यते, तेषां चैवंभूतानामुद्धारपल्योपमानां दश कोटीकोट्य एकमुद्धारसागरोपमं, तेषामेवंरूपाणामर्धतृतीयानामुद्धारसागरोपमाणां यावन्तः समयास्तावत्प्रमाणा द्वीपोदधयः । कथंभूता इत्याह—द्विगुणद्विगुणप्रविस्ताराः पूर्वस्मात् पूर्वस्मात् द्विगुणो द्विगुणः प्रविस्तारो विष्कम्भो येषां ते तथा, तथाहि—जम्बूद्वीपस्य प्रविस्तारो योजनानां शतसहस्रं । इह योजनादिकं सर्वत्रापि प्रमाणाङ्गुलेन वेदितव्यं, "नगपुढविविमाणाइं मिणसु पमाणंगुलेण" इतिवचनप्रामाण्यात् । ततो द्वे लक्षे विष्कम्भो लवणोदसमुद्रस्य, चतस्रो लक्षा धातकीखण्डे, अष्टौ कालोदसमुद्रस्य, षोडश पुष्करवरद्वीपस्य, द्वात्रिंशत् पुष्करवरोदसमुद्रस्य, एवं पूर्वस्मात् पूर्वस्मात् द्विगुणद्विगुणविष्कम्भतया द्वीपसमुद्रास्तावद्वाच्या यावदसङ्ख्येययोजनकोटाकोटीप्रमाणविष्कम्भात् स्वयंभूरमणद्वीपात् स्वयंभूरमणसमुद्रो द्विगुणविष्कम्भः । इत्थंभूतैर्द्विगुणद्विगुणविष्कम्भै-

रर्धतृतीयोद्धारसागरोपमसमयप्रमितैरसङ्ख्येयैर्द्वीपसमुद्रैर्यत् परिमितं क्षेत्रं तावत्प्रमाणा रज्जुर्भवतीत्येतदावेदयन्नाह—'रज्जु एवइया' एतावती एतावत्प्रमाणा रज्जुर्भवति, तेन यत्र क्वापि लोकविभागचिन्तायां रज्जुव्यवहारस्तत्रैतावत्प्रमाणा रज्जुरवसेया। क्वचित् 'होंति एवइया' इति पाठः, तत्रैवं व्याख्या—एतावन्तो द्वीपसमुद्रा भवन्ति ॥ ३ ॥

तदेवं प्रतिपादिताः सर्वसङ्ख्यया द्वीपसमुद्राः, सम्प्रति मनुष्यक्षेत्रपरिमाणप्रतिपादनार्थमाह—

अड्ढाइज्जा दीवा, दोन्नि समुद्दा य माणुसं खेत्तं ।
पणयालसयसहस्सा, विक्खंभायामओ भणियं[१] ॥ ४ ॥

व्याख्या—अर्धतृतीया द्वीपाः, तद्यथा—जम्बूद्वीपो धातकीखण्डद्वीपः पुष्करवरद्वीपस्य चार्धं। द्वौ समुद्रौ, तद्यथा—लवणोदः समुद्रः कालोदः समुद्रश्च। एते पञ्चापि समुदिता मानुषं क्षेत्रं। किमुक्तं भवति? अर्धतृतीयैरुक्तस्वरूपैर्द्वीपैर्द्वाभ्यां समुद्राभ्यामुक्तरूपाभ्यां यद्व्याप्तं क्षेत्रं तन्मानुषं मनुष्याणां सम्बन्धि क्षेत्रं, अत्र मनुष्याणां जन्मनो मरणस्य च संभवात्। तत्र भरतादिषु पञ्चचत्वारिंशत्सङ्ख्येषु क्षेत्रेषु अन्तरद्वीपेषु च षट्पञ्चाशत्सङ्ख्येषु मनुष्याणां जन्म मरणं च सुप्रतीतं, समुद्रवर्षधरपर्वतादिषु पुनः प्रायो जन्म न घटते, मरणं पुनः संहरणतो विद्यालब्धिवशतो वा तत्र स्वयंगतानां भवति, मनुष्यक्षेत्रस्य

१ भणिअं इति वा पाठः।

बहिस्तु जन्मतो मनुष्या न भूता न भवन्ति न भविष्यन्ति च। तथा यदि नाम केनचिद्देवेन दानवेन विद्याधरेण वा पूर्वानुबन्धवैरनिर्यातनार्थमेवंरूपा बुद्धिः क्रियते—यथाऽयं मनुष्योऽस्मात् स्थानादुत्पाट्य मनुष्यक्षेत्रस्य बहिः प्रक्षिप्यते, येनोर्ध्वशोषं शुष्यति म्रियते चेति, तथापि लोकानुभावादेव सा काचनापि बुद्धिर्भूयः परावर्तते यथा संहरणमेव न भवति, संहृत्य वा भूयः समानयति, तेन संहरणतोऽपि मनुष्यक्षेत्राद्बहिर्मनुष्या मरणमधिकृत्य न भूता न भवन्ति न भविष्यन्ति वा। येऽपि जङ्घाचारिणो विद्याचारिणो वा नन्दीश्वरादीनपि यावद्गच्छन्ति तेऽपि तत्र गता न मरणमश्नुवते, किं तु मनुष्यक्षेत्रमागता एव, तेनार्धतृतीयद्वीपद्विसमुद्रपरिमाणं मानुषं क्षेत्रं,न शेषमिति। तच्च किंप्रमाणमित्यायामविष्कम्भाभ्यां तन्मानमाह—'पणयाले'त्यादि अर्धतृतीयद्वीपद्विसमुद्रपरिमाणं मानुषं क्षेत्रं विष्कम्भायामतो विष्कम्भत आयामतश्च भणितं तीर्थकरगणधरैः प्रतिपादितं पञ्चचत्वारिंशच्छतसहस्राणि। कथमिति चेदुच्यते—इह जम्बूद्वीपस्तैलापूपसंस्थानो लवणोदादयस्तु द्विगुणद्विगुणविष्कम्भा वलयाकृतयः, तत्रैकस्यां दिशि पुष्करवरद्वीपस्यार्धमष्टौ योजनानां शतसहस्राणि विष्कम्भतः, अष्टौ कालोदः समुद्रः, चत्वारि धातकीखण्डः, द्वे लवणसमुद्रः, सर्वसङ्ख्यया द्वाविंशतिर्लक्षाः, एता एव लक्षा अपरस्यामपि दिशि, ततो मिलिताश्चतुश्चत्वारिंशत्, एका लक्षा जम्बूद्वीप इति भवति पञ्चचत्वारिंशल्लक्षाप्रमाणं मानुषं क्षेत्रम्॥ ५॥

सम्प्रत्यस्यैव मानुषक्षेत्रस्य परिधिमाह—

एगा जोयणकोडी, लक्खा बायाल तीस य सहस्सा ।
समयखेत्त परिरओ, दो चेव सया अउणपन्ना ॥ ५ ॥

व्याख्या—एका योजनानां कोटिर्द्विचत्वारिंशल्लक्षास्त्रिंशत्सहस्राणि द्वे शते एकोनपञ्चाशदधिके, एष समयक्षेत्रपरिरयः १४२३०२४९ एष मानुषक्षेत्रस्य वृत्तस्य परिधिः । तथाहि—विष्कम्भकृतेर्दशगुणाया मूलं वृत्तपरिक्षेप इति परिधिकरणं । अस्यायमर्थः—विष्कम्भस्य विष्कम्भपरिमाणस्य कृतिर्वर्गो विधीयते, ततस्तस्याः कृतेर्दशभिर्गुणना, ततो मूलं वर्गमूलं यदागच्छति तद्वृत्तस्य वृत्तक्षेत्रस्य परिक्षेपः परिरयः । तत्र मानुषक्षेत्रस्य विष्कम्भः पञ्चचत्वारिंशद्योजनानां लक्षाः, ततः पञ्चचत्वारिंशत् ध्रियते, तस्याश्च पुरतः पञ्च शून्यानि ४५००००० । अमूषां पञ्चचत्वारिंशल्लक्षाणां वर्गो विधीयते, जाता द्विकः शून्यं द्विकः पञ्चकः तस्य पुरस्ताद्दश शून्यानि २०२५०००००००००० । ततो दशभिर्गुणने लब्धं भूयोऽपि एकमधिकं शून्यमिति जातान्येकादश शून्यानि २०२५००००००००००० । ततो "विषमात्पदतस्त्यक्त्वा वर्गं स्थानच्युतेन मूलेन । द्विगुणेन भजेच्छेषं लब्धं विनिवेशयेत्पङ्क्त्याम् ॥ १ ॥ तद्वर्गं संशोध्य द्विगुणीकुर्वीत पूर्ववल्लब्धम् । उत्सार्य ततो विभजेच्छेषं द्विगुणीकृतं दलयेत् ॥ २ ॥" इत्यनेन करणेन वर्गमूलमानीयते, जातोऽयं छेदराशिः—द्वे कोटी चतुरशीतिर्लक्षाः षष्टिः सहस्राणि चत्वारि शतानि नवाशीत्यधिकानि

२०४६०४०९। अत्र नवकलक्षणमन्त्यमङ्कस्थानं न द्विगुणीकृतमिति तद्वर्जयित्वा शेषं सर्वमप्यर्धीक्रियते, लब्धं एका योजनकोटिर्द्विचत्वारिंशल्लक्षाणि त्रिंशत्सहस्राणि द्वे शते एकोनपञ्चाशदधिके, शेषमिदमुद्धरति—एका कोटी त्रयस्त्रिंशल्लक्षाः सप्तनवतिः सहस्राणि नव शतानि नवनवत्यधिकानि, छेदराशिः स एव, केवलं नवकलक्षणमप्यन्त्यमङ्कस्थानं द्विगुणीक्रियते, स्थापना—१३३९७९९९। तत उपरितनराशिश्चतुरादिभिर्गुणयित्वा गव्यूतादिकमानेतव्यं, परं सूत्रकृता नोक्तमिति अस्माभिरप्युपेक्ष्यते ॥ ५ ॥

तदेवमुक्तं समयक्षेत्रस्य परिरयपरिमाणं। सम्प्रति तत्तद्द्वीपसमुद्रवक्तव्यता प्रतिपादनीया। तत्र जम्बूद्वीपः सर्वद्वीपसमुद्राणामादिरिति तद्वक्तव्यतामभिधित्सुः प्रथमतो जम्बूद्वीपस्य यत्रावस्थानं यादृक्संस्थानं यत्परिमाणौ चायामविष्कम्भौ तदेव प्रतिपादयति—

अभिंतरउ दीवो—दहीण पडिपुन्नचंदसंठाणो।
जंबूदीवो लक्खं, विक्खंभायामउ भणिउ ॥ ६ ॥

व्याख्या—जम्ब्वा वक्ष्यमाणस्वरूपया रत्नमय्या उपलक्षितो द्वीपो जम्बूद्वीपः, स च जम्बूद्वीपो द्वीपो मनुष्यक्षेत्रगतो भणितस्तीर्थकरगणधरैः द्वीपोदधीनां समस्तद्वीपसमुद्राणामभ्यन्तरकोऽभ्यन्तरवर्ती, एतेनावस्थानं प्रतिपादितं सकलतिर्यग्लोकमध्यभागे जम्बूद्वीपो वर्तत इति भावः। तथा संपूर्णचन्द्रमण्डलसंस्थानः पौर्णमासीशशाङ्कमण्डलमिव परिपूर्णवृत्तः, एतेन संस्थानमावेदितं, तेन धातकीखण्डादिवन्न

वलयवृत्तः, सैं किंतु प्रतरवृत्त इति प्रतिपत्तव्यं । तथा लक्षं शतसहस्रं योजनानां विष्कम्भायामतो विष्कम्भेणायामेन च, एतेन सर्वद्वीपसमुद्रापेक्षया क्षुल्लकोऽयं द्वीप इति प्रतिपादितं, न चैतदनार्षं, तथा चोक्तं जम्बूद्वीपप्रज्ञप्तौ—"कहि णं भंते जंबुद्दीवे दीवे के महालए णं भंते जंबुद्दीवे दीवे किंसंठिए णं भंते जंबुद्दीवे दीवे किमागारभावपडीयारे णं भंते जंबुद्दीवे दीवे पन्नत्ते? गोयमा! अयन्नं जंबुद्दीवे दीवे सबदीवसमुद्दाणं सबब्भिंतरए सबखुड्डागे वट्टे तेल्लापूपसंठाणसंठिए वट्टे रहचक्कवालसंठाणसंठिए वट्टे पुक्खरकण्णियासंठाणसंठिए वट्टे पडिपुन्नचंदसंठाणसंठिए एगं जोयणसयसहस्सं आयामविक्खंभेणं" इत्यादि ॥ ६॥

सम्प्रति समस्तवृत्तक्षेत्राणां परिरयगणितपदानयनाय करणं प्रतिपादयति—

विक्खंभवग्गदहगुण—करणी वट्टस्स परिरओ होई ।
विक्खंभपायगुणिओ, परिरओ तस्स गणियपयं ॥ ७ ॥

व्याख्या—वृत्तस्य वृत्तक्षेत्रस्य यो विष्कम्भो विष्कम्भपरिमाणं तस्य वर्गो विधीयते, वर्गो नाम तेनैव राशिना तस्य गुणनं, यथा चतुष्कस्य चतुष्केण गुणने षोडश चतुष्कस्य वर्गः । ततो 'दहगुण त्ति' दशभिर्गुणना, ततः करणिरिति वर्गमूलानयनं, ततो वृत्तस्य परिरयपरिमाणं भवति । तथा तस्य परिरयो विष्कम्भस्य पादेन चतुर्थेनांशेन गुणितः सन् गणितपदं भवति ॥ ७ ॥

तदेवमुक्तं सामान्यतः परिधेः करणं गणितपदस्य च । सम्प्रति जम्बूद्वीपस्य प्रक्रान्तत्वात्तत्र प्रथमतः परिधिकरणं भाव्यते—जम्बूद्वीपस्य विष्कम्भो योजनशतसहस्रं, तत एको ध्रियते, तस्य च पुरस्तात्

पञ्च शून्यानि १०००००, तस्य च शतसहस्रस्य वर्गो विधीयते, जातान्येकस्य पुरस्ताद्दश शून्यानि १००००००००००। पुनर्दशभिर्गुणने लब्धमन्यदेकं शून्यमिति जातान्येकादश शून्यानि १०००००००००००। ततो वर्गमूलानयने जातोऽधस्तादयं छेदराशिः—षड्लक्षा द्वात्रिंशत्सहस्राणि चत्वारि शतानि सप्तचत्वारिंशदधिकानि ६३२४४७। तत्र पर्यन्तवर्तिसप्तकरूपमङ्कस्थानं मुक्त्वा शेषं सर्वमपि द्विगुणीकृतमासीदिति अर्धीक्रियते, लब्धानि त्रीणि लक्षाणि षोडश सहस्राणि द्वे शते सप्तविंशत्यधिके ३१६२२७। शेषमुपरिष्टादिदमुद्धरति—चतस्रो लक्षाः चतुरशीतिः सहस्राणि चत्वारि शतानि एकसप्तत्यधिकानि ४८४४७१, एतानि च योजनानि, योजनं च चतुर्भिर्गव्यूतैर्भवति, ततो गव्यूतानयनार्थमेष राशिश्चतुर्भिर्गुण्यते, जातान्येकोनविंशतिर्लक्षाणि सप्तत्रिंशत्सहस्राणि अष्टौ शतानि चतुरशीत्यधिकानि १९३७८८४। छेदराशिः स एव प्राक्तनः षड्लक्षादिः, नवरमन्त्यमपि सप्तकरूपमङ्कस्थानं द्विगुणीक्रियते, तत एवंरूपो भवति—षड् लक्षाणि द्वात्रिंशत्सहस्राणि चत्वारि शतानि चतुःपञ्चाशदधिकानि ६३२४५४। अनेनोपरितनराशेर्भागो ह्रियते, लब्धं क्रोशत्रितयं, शेषमुपरिष्टादिदमुद्धरति—चत्वारिंशत्सहस्राणि पञ्च शतानि द्वाविंशत्यधिकानि ४०५२२, अमूनि च गव्यूतानि, गव्यूतं च धनुषां सहस्रद्वयेन भवति, ततो धनुरानयनार्थमयं राशिः सहस्रद्वयेन गुण्यते, जाता अष्टौ कोटयो दश लक्षाश्चतुश्चत्वारिंशत्सहस्राणि ८१०४४०००। छेदराशिः प्राक्तन एव, ततो लब्धमष्टाविंशं धनुःशतं १२८। शेषमुपरिष्टादिदमुद्धरति—एकोननवतिः सहस्राणि अष्टौ शतानि अष्टाशीत्यधिकानि ८९८८८, एतानि च धनूंषि, धनुश्च षण्णवत्यङ्गुलं

न्वति, ततोऽयं राशिरङ्गुलानयनाय षण्णवत्या गुण्यते, जातानि षण्णवतिः लक्षाणि एकोनत्रिंशत्सहस्राणि द्वे शते अष्टचत्वारिंशदधिके ८६२९२४८ । छेदराशिः स एव, ततो लब्धानि त्रयोदशाङ्गुलानि, शेषमुपरिष्टादिदं—चतस्रो लक्षाः सप्त सहस्राणि त्रीणि शतानि षट्चत्वारिंशदधिकानि ४०७३४६ । अयं राशिरर्धाङ्गुलानयनाय द्विगुणीक्रियते, जाता अष्टौ लक्षाश्चतुर्दश सहस्राणि षट् शतानि द्विनवत्यधिकानि ८१४६९२ । छेदराशिः स एव, लब्धमेकमर्धाङ्गुलं शेषमुद्धरति—एको लक्षो द्व्यशीतिः सहस्राणि द्वे शतेऽष्टात्रिंशदधिके १८२२३८ । एष जम्बूद्वीपपरिधिः ।

तथा चाह—

परिही ति लक्ख सोलस—सहस्स दो सय सत्तवीसहिया ।
कोसतियट्ठावीसं, धणुसय तेरंगुलद्धहियं ॥ ८ ॥

व्याख्या—जम्बूद्वीपस्य परिधिः तिस्रो लक्षाः षोडश सहस्राणि द्वे शते सप्तविंशत्यधिके ३१६२२७, क्रोशत्रिकं त्रीणि गव्यूतानि ३, अष्टाविंशं धनुःशतं १२८, त्रयोदशाङ्गुलान्येकमर्धाङ्गुलं १३½ इति ॥ ८ ॥

सम्प्रति जम्बूद्वीपस्य गणितपदे यदागच्छति तदुपदर्शयन्नाह—

सत्तेव य कोडिसया, नउया छप्पन्नसयसहस्सा य ।
चउणउइं च सहस्सा, सयं दिवड्ढं च साहीयं ॥ ९ ॥

व्याख्या—सप्तैव कोटिशतानि नवतिकोट्यधिकानि षट्पञ्चाशच्छतसहस्राणि चतुर्नवतिः सहस्राणि शतं द्व्यर्धं सार्धं योजनानां शतं ७९०५६९४१५० । कथंभूतमित्याह—साधिकमधिकसहितं ॥ ९ ॥

किंयताधिकेन सहितमित्यधिकमेव निरूपयति—

गाउयमेगं पन्नरस-धणुसया तह धणुणि पन्नरस ।
सट्ठिं च अंगुलाइं, जंबूदीवस्स गणियपयं ॥ १० ॥

व्याख्या—गव्यूतमेकमधिकं, तथा पञ्चदश धनुःशतानि पञ्चदश धनूंषि पञ्चदशोत्तराणि पञ्चदश शतानि धनुषामित्यर्थः। तथा षष्टिरङ्गुलानि । एतज्जम्बूद्वीपस्य गणितपदं भवति । किमुक्तं भवति ? जम्बूद्वीपे योजनप्रमाणान्येतावन्ति चतुरस्राणि खण्डानि यथोक्तसङ्ख्यगव्यूताद्यधिकानि भवन्ति । कथमेवंप्रमाणं जम्बूद्वीपस्य गणितपदं भवतीति चेत् अत आह—इह गणितपदस्यैवंरूपं करणं प्रागुपदिष्टं 'विष्कम्भपादगुणितः परिरयो वृत्तस्य गणितपदं भवतीति' तत्र जम्बूद्वीपस्य विष्कम्भो योजनशतसहस्रं तस्य पादश्चतुर्थांशः पञ्चविंशतिः सहस्राणि तेन गुण्यते परिरयो योजनलक्षत्रयादिकोऽर्धाङ्गुलपर्यवसानः, ततः क्रोशादीनि योजनानि कृत्वा यथोक्तं गणितपदमानीयते ॥ १० ॥

तथा चाह—

एगाइतिलक्खंते, पणुवीससहस्ससंगुणे काउं ।
डग-ठन्नउई-डुसहस्स-चउरं गुणभागहारेहिं ॥ ११ ॥

व्याख्या—एकादीन् एकार्धाङ्गुलप्रभृतीन् त्रिलक्षान्तान् योजनत्रिलक्षपर्यवसानान् अङ्कान् पञ्चविंशतिसहस्रसंगुणान् कृत्वा गुणानां गुणितराशीनां द्विकादिभिर्भागहारैर्गणितपदमानीयते इति सण्टङ्कः । तत्रार्धाङ्गुलराशेरङ्गुलानयनाय द्विको भागहारः, अङ्गुलराशेर्धनुरानयनाय षण्णवतिः, धनूराशेर्गव्यूतानयनाय द्वे सहस्रे, गव्यूतराशेर्योजनानयनाय चत्वार इति । 'गुणभागहारेहि त्ति' गुणानां गुणितानां राशीनां भागहारा गुणभागहारा द्विकादयश्च ते गुणभागहाराश्च तैः । इदमतिसंक्षिप्तमुक्तमिति स्पष्टं भाव्यते—तत्र योजनराशिस्तिस्रो लक्षाः षोडश सहस्राणि द्वे शते सप्तविंशत्यधिके इत्येवंरूपः पञ्चविंशतिसहस्रैर्गुण्यते, गुणितश्च सन् स एतावान् भवति—सप्त कोटिशतानि नवतिः कोटयः षट्पञ्चाशल्लक्षाः पञ्चसप्ततिसहस्राणि ७९०५६७५००० । गव्यूतत्रितयमपि पञ्चविंशतिसहस्राणि गव्यूतानां ७५००० तेषां च चतुर्भिर्भागे हृते लब्धानि योजनानां अष्टादश सहस्राणि सप्त शतानि पञ्चाशदधिकानि १८७५०, एष राशिः पूर्वस्मिन् योजनराशौ प्रक्षिप्यते, ततो धनुषामष्टाविंशं शतं पञ्चविंशतिसहस्रैर्गुण्यते जाता द्वात्रिंशल्लक्षा धनुषां ३२०००००, अष्टाभिश्च धनुःसहस्रैर्योजनं भवति, ततो योजनानयनार्थमष्टभिः सहस्रैर्भागो ह्रियते, लब्धानि चत्वारि योजनशतानि ४००, अयमपि राशिः पूर्वराशौ प्रक्षिप्यते, अङ्गुलान्यपि त्रयोदश पञ्चविंशतिसहस्रगुणानि क्रियन्ते, जातानि त्रीणि लक्षाणि पञ्चविंशतिसहस्राण्यधिकानि ३२५०००। अर्धाङ्गुलमपि पञ्चविंशतिसहस्रैरभ्यस्यते जातान्यर्धाङ्गुलानां पञ्चविंशतिसहस्राणि, तेषामर्धे लब्धान्यङ्गुलानां द्वादश सहस्राणि पञ्चशतान्यधिकानि, तानि पूर्वोक्ताङ्गुलराशौ प्रक्षिप्यन्ते, ततो जातोऽङ्गुलराशि-

त्रीणि लक्षाणि सप्तत्रिंशत्सहस्राणि पञ्चशताधिकानि ३३७५००, तत एतेषां धनुरानयनाय पञ्चवत्या भागो ह्रियते, लब्धानि धनुषां पञ्चत्रिंशच्छतानि पञ्चदशाधिकानि ३५१५, शेषमुद्धरत्यङ्गुलानां षष्टिः, अस्य च धनूराशेर्गव्यूतानयनाय सहस्रद्वयेन भागो ह्रियते, लब्धमेकं गव्यूतं, शेषमुद्धरति धनुषां पञ्चदश शतानि पञ्चदशाधिकानि १५१५, सर्वसङ्ख्यया जातमिदं—योजनानां सप्त कोटिशतानि नवतिकोट्यधिकानि षट्पञ्चाशल्लक्षाश्चतुर्नवतिसहस्राणि शतमेकं पञ्चाशदधिकं, तथा गव्यूतमेकं, धनुषां पञ्चदश शतानि पञ्चदशाधिकानि, षष्टिरङ्गुलानामिति ७९०५६९४१५० । १ । १५१५ । ६० । इति ॥ ११ ॥

तदेवमुक्तं जम्बूद्वीपस्य विष्कम्भायामपरिधिगणितपदपरिमाणं, सम्प्रति जम्बूद्वीपस्यैव जगत्याः परिमाणमाह—

वयरामईए जगईए, परिगओ अट्ठजोयणुच्चाए ।
वारस अट्ठ य चउरो, मूले मज्झुवरि रुंदाए ॥ १२ ॥

व्याख्या—जगती नाम प्राकार उच्यते, तया जगत्या वज्रमय्या वज्ररत्नात्मिकया परिगतो वेष्टितो जम्बूद्वीप इति संबध्यते । कथंभूतयेत्याह—अष्टयोजनोच्चयाऽष्टयोजनप्रमाणोच्छ्रयया । पुनः कथंभूतयेत्याह—मूले मध्ये उपरि च यथासङ्ख्यं द्वादश अष्टौ चत्वारि योजनानि रुंदया विस्तीर्णया । उक्तं च—"से णं जंबुद्दीवे एगाए जगईए सव्वओ समंता संपरिक्खित्ते, सा णं जगई अट्ठ जोयणाइं उड्ढं उच्चत्तेणं, मूले वारस जोयणाइं विक्खंभेणं, मज्झे अट्ठ जोयणाइं विक्खंभेणं, उवरिं चत्तारि जोयणाइं विक्खंभेणं

मूले विच्छिण्णा, मज्झे संखित्ता, उवरिं तणुया, गोपुच्छसंठाणसंठिया, सव्ववइरामया, अच्छा, सण्हा, जाव पडिरूव त्ति"। सा च जगती पञ्चधनुःशतविस्तृतेनार्धयोजनोच्छ्रितेन सर्वरत्नमयेन महतैकेन गवाक्षकटकेन सर्वतः समन्तात् परिक्षिप्ता। तथा चोक्तं जम्बूद्वीपप्रज्ञप्तौ—"सा णं जगई एगेणं महं गवक्खकडएणं सव्वतो समंता संपरिक्खित्ता, से णं गवक्खकडए अद्धजोयणं उड्ढं उच्चत्तेणं, पञ्च धणुसयाइं विक्खंभेणं, सव्वरयणामए जाव पडिरूवे"इति ॥ १२ ॥

इह जगत्या मूले मध्ये उपरि च विष्कम्भपरिमाणमुक्तं, नापान्तराले, ततोऽपान्तरालेऽप्युपरिष्टादधोमुखगमने विष्कम्भपरिज्ञानार्थं करणमाह—

जत्थिच्छसि विक्खंभं, जगईसिहराउ उवइत्ताणं।
तं एगभागलद्धं, चउहिं जुयं जाण विक्खंभं ॥ १३ ॥

व्याख्या—यत्र क्वापि जगत्यां विष्कम्भं ज्ञातुमिच्छसि, तत्र जगतीशिखरादवपत्य उत्तीर्य यावदुत्तीर्णं तदेकभक्तं एकेन भागे हृते सति यल्लब्धं तच्चतुर्भिर्युतं चतुर्भिर्योजनैः सहितं सत् यद्भवति तावत्प्रमाणं तत्र विष्कम्भं जानीहि, तद्यथा—किलोपरितनभागाद्योजनमेकं गव्यूताधिकमवतीर्णः, तत्र च विष्कम्भो ज्ञातुमिष्टः, ततो योजनस्य गव्यूतस्य चैकेन भागो दत्तः, लब्धमेकं योजनं गव्यूताधिकं, तद्योजनचतुष्टयसहितं क्रियते, जातानि पञ्च योजनानि एकं गव्यूतं, एतावत्प्रमाणस्तत्र प्रदेशे विष्कम्भः। एवं सर्वत्रापि परिभावनीयम् ॥ १३ ॥

सम्प्रति मूलादारभ्योर्ध्वगमनेनेप्सितप्रदेशे विष्कम्भपरिज्ञानार्थं करणमाह—

एमेव उप्पइत्ता, जं लद्धं सोहयाहि मूलिल्ला[1] ।
वित्थारा जं सेसं, सो वित्थारो तहिं तस्स ॥ १४ ॥

व्याख्या—यथा उपरिष्टादवतीर्य यदवतीर्णं तस्यैकेन भागो ह्रियते, एवमेव मूलादुत्पत्योर्ध्वं गत्वा यावत्प्रमाणमूर्ध्वं गतस्तस्यैकेन भागे हृते यल्लब्धं तत् 'मूलिल्ला' इति मूलसंबन्धिनो विस्ताराद् द्वादशयोजनप्रमाणाच्छोधय—अपनय, शोधिते च सति यच्छेषं स विस्तारः तत्र योजनादावतिक्रान्ते तस्य देशस्यावगन्तव्यः, तद्यथा—मूलादुत्पत्य योजनमात्रं गव्यूतद्वयाधिकं गतस्तदा योजनस्य गव्यूतद्वयस्य चैकेन भागे हृते लब्धं योजनं गव्यूतद्वयाधिकं, एतन्मूलसंबन्धिनो द्वादशयोजनप्रमाणाद्विस्तारादपनीयते, स्थितानि दश योजनानि गव्यूतद्वयाधिकानि, एतावत्प्रमाणः सार्धयोजनातिक्रमे विस्तारः, एवं सर्वत्रापि भावनीयम् ॥ १४॥

तदेवमक्लेशेन जगत्यामीप्सितप्रदेशे विष्कम्भपरिज्ञानार्थं करणमभिधाय सम्प्रति जगत्या उपरि यद्वर्तते तत्प्रतिपादयन्नाह—

पंचेव धणुसयाइं, विछिण्णा अद्धजोयणुच्चिद्धा ।
वेइ वणसंडा जए, देसूणदुजोयणे रुंदा ॥ १५ ॥

---

१ उवरिल्ला इत्यपि पाठः.

व्याख्या—इह जगत्या जम्बूद्वीपस्य सर्वतो वलयाकारेण व्यवस्थिताया यदुपरितनं चतुर्योजनविस्ता-
रात्मकं तलं तस्मिन् बहुमध्यदेशभागे महत्येका परिक्षेपेण जगतीसमाना सर्वरत्नमयी, तद्यथा—मूले
वज्रमयी तत उपरिष्टाद्रिष्टरत्नमयी वज्रमयास्तम्भताः स्तम्भाः सुवर्णरूप्यमयानि फलकानीत्येवंरूपा वेदि-
का पद्मवरवेदिका वर्तते, सा च पञ्च धनुःशतानि विस्तीर्णा, अर्धयोजनं गव्यूतद्वयप्रमाणमुच्छ्रिता उच्चै-
स्त्वेन व्यवस्थिता । उक्तं च—"तीसे णं जगईए उप्पिं बहुमज्झदेसभागे एत्थ णं महई एगा पउमवरवे-
इया पन्नत्ता अद्धजोयणं उड्ढं उच्चत्तेणं पंच धणुसयाइं विक्खंभेणं जगईए समाणा परिक्खेवेणं सव्वरयण-
मया" इत्यादि । अथ किमसौ वेदिका पद्मवरवेदिकेति व्यपदिश्यते ? उच्यते—तस्यां वेदिकायां तत्र
तत्र प्रदेशे उपरितले उपवेशनतले वेदिकाबाहासु वेदिकास्तम्भेषु वेदिकाफलकेषु च सर्वरत्नमयानि शत-
पत्रसहस्रपत्रादिरूपाणि पद्मानि वर्तन्ते, तेन पद्मवरा पद्मप्रधाना वेदिका पद्मवरवेदिकेति व्यपदेशः ।
तस्याश्च पद्मवरवेदिकाया बहिर्भागे एको वनखण्डः एको वनखण्डोऽन्तर्भागे (च) । तौ च द्वावपि वन-
खण्डौ परिक्षेपेण पद्मवरवेदिकासमानौ विष्कम्भेण देशोने द्वे द्वे योजने अर्धतृतीयधनुःशतोने द्वे द्वे
योजने इत्यर्थः । एकैकस्य वनखण्डस्यान्तर्बहुसमरमणीयो यो भूमिभागः स पञ्चविधैर्मणिभिः तद्यथा—
पीतवर्णैः कृष्णवर्णैर्नीलवर्णैर्हारिद्रवर्णैः शुक्लवर्णैश्च तृणैरपि यथायोगं नानावर्णैर्नयनविलोकनीयकान्ति-
भिरुपशोभितः, तेषां च मणीनां तृणानां च गन्धः कर्पूरकस्तूरिकादिगन्धादतीव घ्राणमनःप्रह्लादकारी,
स्पर्शोऽपि शिरीषकुसुमसञ्चयादप्यतीव सुकुमारः, तृणानामपि पूर्वादिदिग्विदिक्संभवैर्वायुभिर्मन्दं मन्दं

व्याख्या—पुनःशब्दो वाच्यभेदे, द्वाराणि पुनर्जम्बूद्वीपस्य पूर्वादिषु चतसृषु दिक्षु प्रत्येकमेकैकद्वारभावेन सर्वसङ्ख्यया चत्वारि द्वाराणि भवन्ति । तद्यथा—मेरुमपेक्ष्य एकं पूर्वस्यां दिशि एकमपरस्यामेकं दक्षिणस्यामेकमुत्तरस्यामिति ॥ १६ ॥

सम्प्रत्येतेषामेव द्वाराणां विस्तारादिप्रमाणप्रतिपादनार्थमाह—

चउजोयणविछिन्ना, अट्ठेव य जोयणाइ उच्चिठा ।
उभउ वि कोसकोसं, कुड्डा बाहल्लउ तेसिं ॥ १७ ॥

व्याख्या—चत्वार्यपि द्वाराणि प्रत्येकं चत्वारि चत्वारि योजनानि विस्तीर्णानि, अष्टावष्टौ च योजनानि उद्विद्धान्युच्चानीत्यर्थः । तथा तेषां द्वाराणां मध्ये एकैकस्य द्वारस्य उभयत उभयोरपि पार्श्वयोर्यदेकैकं कुड्यं, कुड्ये द्वारशाखापरपर्याये बाहल्यतः पृथुत्वेन क्रोशं क्रोशं भवतः । क्रोशं क्रोशमित्यत्र च "कालाध्वभावदेशं वा कर्म चाकर्मणां" (सिद्धहेम०२-२-२३) इति द्वितीया । इह यत एकैकस्य द्वारस्यैकैका द्वारशाखा क्रोशक्रोशप्रमाणपृथुत्वा द्वारं द्वारं च चतुर्योजनविस्तारं, अतः सामस्त्येनैकैकं द्वारं परिभाव्यमानं अर्धपञ्चमयोजनप्रमाणपृथुत्वमवसेयम् ॥ १७ ॥

---

१ उविद्धा इत्यपि पाठः.

क्वचित्केतकीगृहं क्वचिल्लतागृहं क्वचित्प्रेक्षणकगृहं क्वचिन्मज्जनकगृहं क्वचित्प्रसाधनकगृहं क्वचिद्गर्भगृहमित्यादि । एतेषां च गृहाणामन्तः प्रत्येकमेकैकसङ्ख्याकानि तन्निवासिदेवजनयोग्यानि सर्वरत्नमयानि नानाप्रकाराणि हंसासनगरुडासनप्रभृतीन्यासनानि, तथा तत्र तत्र प्रदेशे सर्वरत्नमया भूयांसो मण्डपाः, तद्यथा—क्वचिज्जातीमण्डपः क्वचिन्मालतीमण्डपः क्वचिन्मल्लिकामण्डपः क्वचिन्नवमल्लिकामण्डपः क्वचिन्मृद्वीकामण्डपः क्वचिच्छ्यामलतामण्डप इत्यादि । एतेषु च मण्डपेषु मध्ये भूयांसो नयनविलोभनीया नानासंस्थानाः शिलापट्टकाः, तद्यथा—कोऽपि हंसासनसंस्थितः कोऽपि गरुडासनसंस्थित इत्यादि, ते च सर्वेऽपि कनकमयाः । एतेषु च क्रीडापर्वतेषु गृहेषु मण्डपेषु च समुपार्जितजन्मान्तरपुण्यकर्मोपचया बहवो वानमन्तरा देवा देव्यश्च यथासुखमासते शेरते निषीदन्ति क्रीडन्तीति ॥ १५ ॥

साम्प्रतमतिदेशेन सर्वेष्वपि द्वीपसमुद्रेषु जगत्यादीन् प्रतिपादयति—

एएहिं परिखित्ता, दीवसमुद्दा हवंति सव्वे वि ।

व्याख्या—एतैर्जगतीतदुपरिवेदिकावनखण्डैः परिक्षिप्ताः सर्वेऽपि द्वीपसमुद्रा भवन्ति, तथाहि—सर्वेऽपि लवणादयः समुद्राः स्वयंभूरमणसमुद्रपर्यवसानाः सर्वेऽपि च धातकीखण्डादयो द्वीपाः स्वयंभूरमणद्वीपपर्यन्ताः प्रत्येकं पद्मवरवेदिकावनखण्डमण्डितशिरोभागया जगत्या परिवेष्टिता वर्तन्ते ॥

सम्प्रति जम्बूद्वीपे एव जगत्या द्वारप्रतिपादनार्थं गाथापश्चार्धमाह—

चत्तारि दुवारा पुण, चउद्दिसिं जंबूदीवस्स ॥ १६ ॥

व्याख्या—पुनःशब्दो वाच्यभेदे, द्वाराणि पुनर्जम्बूद्वीपस्य पूर्वादिषु चतसृषु दिक्षु प्रत्येकमेकैकद्वारभावेन सर्वसङ्ख्यया चत्वारि द्वाराणि भवन्ति । तद्यथा—मेरुमपेक्ष्य एकं पूर्वस्यां दिशि एकमपरस्यामेकं दक्षिणस्यामेकमुत्तरस्यामिति ॥ १६ ॥

सम्प्रत्येतेषामेव द्वाराणां विस्तारादिप्रमाणप्रतिपादनार्थमाह—

चउजोयणविच्छिन्ना, अट्ठेव य जोयणाइ उच्चिट्ठा ।
उभओ वि कोसकोसं, कुड्डा बाहल्लओ तेसिं ॥ १७ ॥

व्याख्या—चत्वार्यपि द्वाराणि प्रत्येकं चत्वारि चत्वारि योजनानि विस्तीर्णानि, अष्टावष्टौ च योजनानि उद्विद्धान्युच्चानीत्यर्थः । तथा तेषां द्वाराणां मध्ये एकैकस्य द्वारस्य उभयत उभयोरपि पार्श्वयोर्यदेकैकं कुड्यं, कुड्ये द्वारशाखापरपर्याये बाहल्यतः पृथुत्वेन क्रोशं क्रोशं भवतः । क्रोशं क्रोशमित्यत्र च "कालाध्वभावदेशं वा कर्म चाकर्मणां" (सिद्धहेम०२-२-२३) इति द्वितीया । इह यत एकैकस्य द्वारस्यैकैका द्वारशाखा क्रोशक्रोशप्रमाणपृथुत्वा द्वारं द्वारं च चतुर्योजनविस्तारं, अतः सामस्त्येनैकैकं द्वारं परिभाव्यमानं अर्धपञ्चमयोजनप्रमाणपृथुत्वमवसेयम् ॥ १७ ॥

---

१ उद्विद्धा इत्यपि पाठः.

सम्प्रति कस्यां दिशि किंनामधेयं द्वारमित्येतन्निरूपणार्थमाह—

पुव्वेण होइ विजयं, दाहिणउं होइ वेजयंतं तु ।
अवरेणं तु जयंतं, अवराइय उत्तरे पासे ॥ १८ ॥

व्याख्या—मेरोः पूर्वेण पूर्वस्यां दिशि पञ्चचत्वारिंशद्योजनसहस्राण्यतिवाह्य लवणसमुद्रपूर्वभागमधि-
कृत्यापरस्यां दिशि यद्वर्तते शीताया महानद्या उपरिष्टाद्द्वारं तद्विजयं विजयनामधेयमवसेयं । तथा मेरुमेवा-
वधीकृत्य दक्षिणतो दक्षिणस्यां दिशि पञ्चचत्वारिंशद्योजनसहस्राण्यतिक्रम्य लवणसमुद्रदक्षिणभागमधि-
कृत्योत्तरस्यां दिशि यद्वर्तते द्वारं तद्वेजयन्तं विजयन्तनामकं । तथा मेरोरपरस्यां पश्चिमायां दिशि पञ्चच-
त्वारिंशदेव (तमेव) योजनसहस्राण्यतिक्रम्य लवणसमुद्रपश्चिमभागमधिकृत्य पूर्वस्यां दिशि शीतोदाया
महानद्या उपरिष्टाद्यदस्ति द्वारं तज्जयन्तं जयन्ताभिधं । मेरोः पुनरुत्तरस्यां दिशि पञ्चचत्वारिंशद्योजन-
सहस्राण्यतिक्रम्य लवणसमुद्रोत्तरभागमपेक्ष्य दक्षिणस्यां दिशि यदस्ति द्वारं तदपराजितमपराजितसंज्ञं ।
अमूनि च द्वाराणि भूम्यन्तःप्रदेशे वज्रमयानि, भूमेरूर्ध्वं रिष्टरत्नमयानि, सर्वत्रापि च स्तम्भा वैडूर्य-
मयाः, पञ्चविधमणिरत्ननिर्मापितं कोट्टिमतलं, हंसगर्भाख्यरत्नात्मिका देहल्यो, गोमेयाभिधरत्नमया
इन्द्रकीलका, द्वारशाखा लोहिताख्यरत्नमय्यः, कपाटानि वैडूर्यरत्नमयानि, वज्रात्मिकाः परिघाः ।

१ गोमेदापरनाम.

अमीषां च द्वाराणां प्रत्येकं यत्तोरणाद्युपवर्णनं तज्जीवाभिगमादिशास्त्रतोऽवसेयं, इह तु ग्रन्थगौरवभयान्न क्रियते ॥ १८ ॥

साम्प्रतमेतेषां द्वाराणामधिष्ठातारो ये देवास्तेषां स्वरूपमभिधित्सुमाह—

पलिउवमठिईया, सुरगणपरिवारिया सदेवीया ।
एएसु दारनामा, वसंति देवा महड्ढीया ॥ १९ ॥

व्याख्या—एतेषु अनन्तरोक्तस्वरूपेषु विजयादिषु द्वारेषु देवा वसन्तीति योगः । कथंभूतास्त इत्याह—पल्योपमस्थितिकाः पल्योपमं स्थितिर्येषां ते पल्योपमस्थितिकाः पल्योपमप्रमाणायुःस्थितयः इत्यर्थः । तथा सुरगणपरिवारिता इति सुरा देवाः, ते च व्यन्तरा अवगन्तव्याः, तानेव प्रति तेषामाधिपत्यसंभवात्, तेषां गणः समूहः तेन परिवारिताः सुरगणपरिवारिताः, यदिवा सुरगण एव परिवारः सुरगणपरिवारः, स संजातो येषां ते सुरगणपरिवारिताः, तारकादिदर्शनादितप्रत्ययः, ते हि प्रत्येकं चतुर्णामिन्द्रसामानिकदेवसहस्राणां तिसृणां पर्षदां सप्तानामनीकानां सप्तानामनीकाधिपतीनां षोडशानामात्मरक्षकदेवसहस्राणामन्येषामपि स्वस्वविजयाद्यभिधानराजधानीवास्तव्यानां भूयसां वानमन्तराणां देवानां देवीनां चाधिपतय इति भवन्ति ते सुरगणपरिवारिताः । तथा सह देवीभिः वर्तन्ते इति सहदेवीकाः, तत्राप्यी-

---

१ सदेवीकाः इति मूलानुसारेण साधु.

यानपि वानमन्तरो देव्या सह वर्तत इति न देवीमात्रप्रतिपादने विशेषणं फलवदिति सामर्थ्यात् प्रत्येकं चतसृभिरग्रमहिषीभिः सपरिवाराभिर्देवीभिः सह वर्तन्त इति द्रष्टव्यं, तथा प्रवचने प्रतिपादनात्। किंनामानस्त इत्याह—द्वारनामानः द्वाराणामिव नामानि येषां ते तथा, किमुक्तं भवति ? यान्येव द्वाराणां विजयादीनि नामानि तान्येव यथाक्रमं द्वाराधिपतीनां देवानामपि, देवाभिधानवशतो द्वाराणामभिधानप्रवृत्तेः, तथाहि—यो यः पूर्वद्वाराधिपतिरुत्पद्यते देवः स स तत्संबन्धिभिरिन्द्रसामानिकादिभिर्देवैर्विजयो विजय इत्याहूयते, तत्स्थितिप्रतिपादके कल्पपुस्तके तथाऽभिधानात्, ततोऽस्य द्वारस्य विजयनामा देवोऽधिपतिरिति द्वारमपि विजयमित्यभिधीयते। एवं शेषाण्यपि द्वारनामानि भावनीयानि। न चैतदनार्षं, यत उक्तं जीवाभिगमे—"से केणट्ठेणं भंते एवं वुच्चइ विजयदारे इति ? गोयमा ! विजए णं दारे विजयनामं देवे महिड्ढीए महज्जुइए महाबले महायसे महासोक्खे पलिओवमट्ठिईए परिवसति, से णं तत्थ चउण्हं सामाणियसाहस्सीणं चउण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अणियाणं सत्तण्हं अणियाहिवईणं सोलसण्हं आयरक्खियसहस्सीणं विजयस्स दारस्स विजयाए रायहाणीए अन्नेसिं च बहूणं विजयरायहाणिवत्थव्वाणं देवाणं देवीण य आहेवच्चं सामित्तं भट्टित्तं महत्तरगत्तं आणाईसरसेणावच्चं कारेमाणे पालेमाणे जाव दिव्वाइं भोगभोगाइं भुंजमाणे विहरइ, से एएणट्ठेणं गोयमा ! एवं वुच्चइ विजयदारे" इति। एवं शेषेष्वपि द्वारेषु प्रश्ननिर्वचनरूपा आलापका वेदितव्याः।

तथा महती ऋद्धिर्येषां ते महर्द्धिकाः; महर्द्धिकत्वं च यथोक्तसङ्ख्याकानिन्द्रसामानिकादीन् देवान् विजयादीनि द्वाराणि विजयादिकाश्च नगरीः प्रति स्वामित्वभावात् ॥

अथावगतानि विजयादीनि द्वाराणि, यास्तु विजयाद्यभिधाना नगर्यस्ताः क्व वर्तन्ते किंस्वरूपास्ताः ? इत्युच्यते—इह विजयस्य द्वारस्य पूर्वस्यां दिशि तिर्यगसङ्ख्येयान् द्वीपसमुद्रानतिक्रम्यापरस्मिन् जम्बूद्वीपाभिधे द्वीपे द्वादशयोजनसहस्राण्यवगाह्यात्रान्तरे विजयस्य देवस्य विजया नाम राजधानी समस्ति, सा च द्वादशयोजनसहस्राण्यायामविष्कम्भाभ्यां सप्तत्रिंशद्योजनसहस्राणि नव शतानि सप्तचत्वारिंशानि ३७९४७ किञ्चिद्विशेषाधिकानि परिक्षेपेण। तस्याश्च राजधान्याः समन्ततः परिक्षेपी सर्वरत्नमयः प्राकारः, स च सार्धानि सप्तत्रिंशद्योजनान्युच्चैस्त्वेन, मूले विस्तृतः सार्धानि द्वादश योजनानि, मध्ये क्रोशाधिकानि षड् योजनानि, उपरि भागे चार्धक्रोशाधिकानि त्रीणि योजनानि, तस्य प्राकारस्योपरि पञ्चधनुःशतविस्तृतानि क्रोशार्धप्रमाणायामानि देशोनार्धक्रोशोच्चानि सर्वमणिमयानि कपिशीर्षकाणि, तानि च पञ्चवर्णानि, तद्यथा—कानिचित् कृष्णवर्णानि, कानिचिन्नीलवर्णानि, कानिचिल्लोहितवर्णानि, कानिचिद्धारिद्रवर्णानि, कानिचित् (च) शुक्लवर्णानि। तस्याश्च राजधान्या एकैकस्यां बाहायां पञ्चविंशं द्वाराणां शतं, तानि च द्वाराणि प्रत्येकं सार्धद्वाषष्टियोजनान्युच्चैस्त्वेन एकत्रिंशद्योजनानि सक्रोशानि विष्कम्भतः। तेषां च द्वाराणामुपवर्णनं यथा जीवाभिगमे तथा प्रतिपत्तव्यं। एकैकस्य च द्वारस्योपकण्ठमुभयोः पार्श्वयोः प्रत्येकमेकैको महान् पीठः, ते च पीठाः सर्वरत्नमया बाहल्यतोऽर्धतृतीयक्रोशाधिकानि

पञ्चदश योजनानि, सक्रोशान्येकत्रिंशद्योजनान्यायामविष्कम्भाभ्यां । तेषां च पीठानामुपरि प्रत्येकमेकैकः प्रासादावतंसकः, ते च प्रासादावतंसका अर्धतृतीयक्रोशाधिकानि पञ्चदशयोजनान्यायामविष्कम्भाभ्यां, एकत्रिंशद्योजनानि सक्रोशान्युच्चैस्त्वेन । तथा एकैकस्य द्वारस्य नातिदूरप्रत्यासन्ने भूभागे सप्तदश भौमाः प्रासादा वर्तन्ते, तत्र नव नव भौमा मध्यभागे, अष्टावष्टौ तेषां पृष्ठतः । तत्र ये मध्यवर्तिनो नव नव भौमास्तेषामन्तः प्रत्येकं विजयदेवस्य सिंहासनं, तस्य च सिंहासनस्य परि समन्तात् क्रमेणेन्द्रसामानिकादिदेवानां योग्यानि सिंहासनानि, शेषेषु च बहिर्वर्तिष्वष्टस्वष्टसु भौमेषु प्रासादेषु प्रत्येकमेकैकं सिंहासनमिति । तथा तस्या राजधान्या बहिश्चतसृषु दिक्षु पञ्च पञ्च योजनशतान्यतिनाद्यातिवाह्य परत एकैको वनखण्डः, तद्यथा—पूर्वस्यां दिशि एको दक्षिणस्यामेकोऽपरस्यामेक उत्तरस्यामेकः । पूर्वस्यां च दिशि वनमशोकवनं, दक्षिणतः सप्तपर्णवनं, पश्चिमायां चम्पकवनं, उत्तरस्यां चूतवनम् । एते च वनखण्डाः प्रत्येकं सातिरेकाणि द्वादशयोजनसहस्राण्यायामेन, पञ्च योजनशतानि विष्कम्भतः, प्रत्येकं च प्राकारपरिक्षिप्ताः । तेषां च वनखण्डानां बहुमध्यदेशभागे प्रत्येकमेकैकः प्रासादावतंसकः, ते च प्रासादावतंसकाः प्रत्येकं सार्धद्वाषष्टियोजनान्युच्चैस्त्वेन, सक्रोशान्येकत्रिंशद्योजनानि विष्कम्भतः, तेषु चान्तः प्रत्येकमेकैकं सिंहासनं । तेषु चैवंभूतेषु प्रासादेषु प्रत्येकमेकैको महर्द्धिकः पल्योपमस्थितिको देवः परिवसति । तत्र पूर्वस्मिन् प्रासादेऽशोकनामा दक्षिणस्मिन् सप्तपर्णः पश्चिमे चम्पक उत्तरस्मिन् चूतः, एते च प्रत्येकं स्वस्य वनखण्डस्य स्वकीयानां स्वकीयानां सामानिकदेवानां स्वकीयानां